International Journal of Sanskrit Research 2021; 7(1): 189-192

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 189-192
© 2021 IJSR
www.anantaajournal.com
Received: 24-10-2020
Accepted: 05-12-2020

**श्रीतपनकुमारदास:**
शोधच्छात्र:, विश्वभारतीविश्वविद्यालय:,
पश्चिम बंगाल, भारत

**Corresponding Author:**
**श्रीतपनकुमारदास:**
शोधच्छात्र:, विश्वभारतीविश्वविद्यालय:,
पश्चिम बंगाल, भारत

# उपनिषत्सु रसभावयोरभिचिन्तनम्

**श्रीतपनकुमारदास:**

**DOI:** https://doi.org/10.22271/23947519.2021.v7.i1d.1291

**रस:**

संस्कृतालंकारसाहित्यस्य प्रस्थानेषु रसप्रस्थानमेकं सुप्रसिद्धम्। भरतस्य नाट्यशास्त्रात् पण्डितराजजगन्नाथपर्यन्तं प्रस्थानस्यास्य धारैका विच्छेदविहीनतया प्रवाहितासीत् । रसो हि काव्यस्यात्मेति सिद्धान्तस्य प्रतिपादनमेवास्य मुख्यो विषय: । रस्यत आस्वाद्यत इति रस:। यद् आस्वादितमस्ति स एव रस:। काव्ये साहित्ये वा मानवीयचित्तवृत्तीनामनुभूतिवशाद् यो मानसानन्दो विद्यते, स हि रस इत्युच्यते । प्रीतिरानन्द आस्वाद: चर्वणा चमत्कारश्चेति रसस्य समार्थका एव शब्दा: । भरतमतेन अस्य लक्षणं यथा - "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्ति: ह्न (ना. शा., ६/३१ गद्यम्)। अस्यार्थो भवति – विभावोऽनुभावो व्यभिचारिभावश्च स्थायिभावेन सह संयुक्ता: सन्तो रसं निष्पादयन्ति प्रकाशयन्ति वा । विभावादिकस्य संक्षिप्त: परिचयो निम्ने प्रदीयते –

यो रत्यादिभावान् (मानवहृदयस्य प्रधाना अप्रधाना वृत्ती:) उद्बोधयति स एव <u>विभाव:</u> (कारणम्)। अयं च द्विविध: - आलम्बनम् (नायक-नायिकादिपदार्था:, प्रधानकारणम्) उद्दीपनं (अङ्कुरितरसस्य परिपोषकम्, सहकारिकारणम्) चेति। यथा – रामस्य शृङ्गाररसस्य (रतिभावस्य) आलम्बनविभाव: सीता उद्दीपनविभावश्च चन्द्रोदयादिकम्।

क्रोधादय: स्थायिनो भावा उद्बुद्धा भवन्ति यदा तदा या: शारीरिक्यो मानसिक्यश्च प्रतिक्रिया: प्रकाश्यन्ते स एवानुभाव इति कथ्यते। मनोभावस्य बाह्य: प्रकाश एवा<u>नुभाव</u> इति सरलार्थ:। यथा – मनसि पूर्वं यदि क्रोधो जागर्य्यते पश्चात्तर्हि शरीरस्य चक्षुरङ्गं रक्तवर्णं भवति नासिकाङ्गं च स्फीतमस्ति। इमानि शारीरिकाणि अवस्थान्तराणि एकैकस्य रसस्य एकैकविधानि सन्ति। यथा – शृङ्गारे आनन्दो लज्जा कम्प इत्यादीनि करुणे च क्षोभो हताशा रोदनमित्यादीनि।

यत् काव्यस्य नाटकस्य वा नायकेषु नायिकासु चान्तिमपर्यन्तं स्थिरतया विद्यते, स एव <u>स्थायिभाव:</u>। भावोऽयं रसस्य मूलोपादानम्। यथा – रतिरभिज्ञानशकुन्तले नायकनायिकयोरन्तिमपर्यन्तं तिष्ठतीति सा रतिरेव स्थायिभाव:। नाटकेऽस्मिन् शोकादिकं वर्तते, परन्तु परिशेषावधि नास्तीति शोकादिकं न स्थायिभाव:। अयं स्थायिभावो नवविध इति विश्वनाथस्याभिमतम्। उक्तञ्चात्र –

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ता: शमोऽपि च।।
(सा. द., ३/१८४, पृष्ठा – ११९)

व्यभिचारिभावा नानारूपेण रसनिष्पत्तेरानुकूल्येन सञ्चारिता भवन्ति। अत एते सञ्चारिभावा इत्यभिधीयन्ते। इमे भावा अस्थायिन:। एते च समुद्रजलतरङ्गतुल्या:। आविर्भवन्तीमे कदापि, कदापि वा तिरोहिता: सन्ति। यावद् रसपुष्ट्या प्रयोजनम्, तावदेव एषामाविर्भावो रसनिष्पत्तौ च सत्यामेव एषां तिरोभावो भवत:। एते व्यभिचारिणो भावा: संख्यया त्रयस्त्रिंशदिति भरतमतम्। त्रयस्त्रिंशति व्यभिचारिभावेषु मतिरेका। विश्वनाथो मन्यते यत्, नीतिशास्त्रानुसरणमनुमानं चेत्यादिकाद् यद् ज्ञानमुत्पद्यते, सैव मतिर्नाम। अतो ज्ञानादीषद्हास्यं धैर्य्यं सन्तोष आदरश्चेत्यादिकं जायते। यथा – अभिज्ञानशकुन्तले शकुन्तलां दृष्ट्वा दुष्यन्त उक्तवान् – "असंशयं क्षत्रपरिग्रहक्षमा .......ह्न (१/२०) इति। श्लोकेनानेन साधूनामभिलाषाद् दुष्यन्तस्य शकुन्तलायां क्षत्रियविवाहयोग्यता प्रतिपादितेति मतेरुदाहरणम्। मतिरियं नाटकस्य परिसमाप्तिपर्यन्तं नायकनायिकयोर्न तिष्ठतीत्यस्थायित्वम्।

स्थायिव्यभिचारिभावद्वयस्य वर्णनात् परं नाट्यशास्त्रे सात्त्विका अष्टौ भावा विवृता:। एते भावा यथा –

स्तम्भ: स्वेदोऽथ रोमाञ्च: स्वरसादोऽथ वेपथु:।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका: स्मृता:।।
(ना. शा., ७/९४, पृष्ठा – १८९)

सात्त्विकभावस्य लक्षणं विश्वनाथेन दत्तम् – "विकारा: सत्त्वसम्भूता: सात्त्विका: परिकीर्तिता:ह्व (सा. द., ३/१४२, पृष्ठा – १०१) इति। अत्र सत्त्वं नाम मन:सम्भूतम्। तच्च समाहितमनस उत्पद्यते। मन:समाहितभावात् सत्त्वनिष्पत्तिर्भवति। अन्यमनस्को जनो (नट:) रोमाञ्चादिकं प्रकाशयितुं न शक्नोति। यथा – दु:खं नाम रोदनात्मकम्। तत् कथमदु:खितेन जनेन (नटेन) अभिनेतव्यम् ? पुनश्च, सुखं प्रहर्षात्मकम्। तत् कथमसुखितेन अभिनेयम् ? सात्त्विकभावा एव यथार्थेन दु:खितेन सुखितेन वा नटेन प्रदर्शनीया:। यथा - यथार्थदु:खितनटेन तावद् अश्रुणोऽभिनय: कर्तव्य:। यथार्थसुखभावितचित्तनटेन वा रोमाञ्च: प्रदर्शनीय:। अतो यथार्थत एव तद्भावभावितनटेन भावा एते प्रदर्शयितव्या इति ते सात्त्विकनाम्नाभिधीयन्ते। याथार्थ्येन नटो यदि तद्भावभावितो न भवति, तर्हि स एतेषां भावानां नैपुण्येन प्रदर्शने समर्थो नास्तीत्येव अन्यभावत एषां वैशिष्ट्यम्। काव्यस्य विभावोऽनुभावश्चेति द्वयस्य परिशेषे यद्यपि भावोऽस्ति, तथापि द्वयमेतन्न भाव:। स्थायिभावो व्यभिचारिभावश्चेति द्वयं यथार्थो भाव एव (परवर्तिनि भावप्रकरणे भावलक्षणं द्रष्टव्यम्)। तत्र स्थायिभाव एव प्रधानो विभावादयश्च तमास्वाद्यमानं कुर्वन्ति। यथा – अन्नमेव प्रधानम्, व्यञ्जनादिकं तस्यैव स्वादं वर्धयति च। उक्तञ्चात्र भरतेन –

यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम्।
आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जना:।।
भावाभिनयसंयुक्ता: स्थायिभावांस्तथा बुधा:।
आस्वादयन्ति मनसा तस्मान्नाट्यरसा: स्मृता:।।
(ना. शा., ६/३२-३३, पृष्ठा – १३८)

रसो रत्यादिस्थायिभावानामाधारेणैव परिकल्पित आसीत्। भावहीनो रसो नास्ति रसवर्जितश्च भावो न वर्तते। एतयोरथ सार्थकता परस्परमपेक्षते। उक्तञ्च –

न भावहीनोऽस्ति रसो न भावो रसवर्जित:।
(ना. शा., ६/३६, पृष्ठा – १३८)

**रसस्य संख्या**

आलंकारिकेषु रससंख्यामाश्रित्य मतानैक्यं दृश्यते। तेषु नाट्यशास्त्रकारेण भरतेन रसा अष्टौ समुल्लिखिता:। उक्तञ्च –

शृङ्गारहास्यकरुणा रौद्रवीरभयानका:।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसा: स्मृता:।।
(ना. शा., ६/१५, पृष्ठा – १३३)

उक्तरसाष्टकं स्वीकृतं धनञ्जयेन धनिकेन च (दशरूपकम् – ४/४३-४४, अवलोक:)।
अभिनवगुप्तो मम्मटो जगन्नाथश्च नवमरसरूपेण शान्तं स्वीकृतवन्त:।
विश्वनाथाचार्यो दशमरसत्वेन वत्सलं परिगृहीतवान् – " वत्सलश्च रस इति तेन स दशमो रस:ह्व (सा. द., ३/२३१, पृष्ठा – १४८)।

एवमेव रसविस्तार आलंकारिकेषु यथा दृश्यते, तथा रसानां प्राधान्यमधिकृत्य रससङ्कोचनमपि परिलक्ष्यते – शृङ्गारो मुख्यो रस इति मतिर्भोजस्य, रूपगोस्वामी भक्तिप्राधान्यं स्वीकृतवान्, भवभुतिना करुणस्य प्रधानता स्वीकृता, अभिनवगुप्तो मोक्षस्य परमपुरुषार्थत्वात् शान्तं मुख्यतया विवेचितवान् (लोचनटीका, ध्वन्यालोक: ३/२६, पृष्ठा – १८६), विश्वनाथात् पूर्ववर्तिना श्रीमन्नारायणपादेन चाद्भुत एव प्राधान्येनाभ्युपेतो रसे सर्वत्र चमत्कारानुभूतिवशात् (सा. द., ३/२ वृत्ति:, पृष्ठा – ४२)।
ब्रह्मास्वादसहोदर एष रसो यद्यपि सूक्ष्मतया एक एव, तथाप्युपचारदृष्टिवशात् (व्यवहारप्रयोजनात्) शृङ्गारादिनानाभावेन स वर्णितोऽभवत्।

**उपनिषत्सु रसचिन्तनम्**

ब्रह्मज्ञानं मोक्षश्चैव उपनिषदामालोच्यो विषय:। अत एतासु प्रधानरूपेण शान्तरसो विद्यते। परन्तु ब्रह्मणोऽज्ञेयता सर्वव्यापिता शक्तिमत्ता विलक्षणता सर्वनियन्तृता चेत्यादीनां वैचित्र्येण प्रतिपादनार्थमुपनिषत्सु तावद् अद्भुतोऽपि समायात:।

**शान्तरस:**

संस्कृतकाव्यतत्त्वसमीक्षायां शान्तरसोऽतीव वितर्कितो विषय एक: । तत्र कालिदासमहाकविरष्टरसविलक्षणं शान्तरसं नाभ्युपगतवान् (विक्रमोर्वशीयम्, २/१८) । काव्यनाट्ययोरुभयोरेव रसोऽयं जगन्नाथेन प्रतिपन्नो धनञ्जयेन च नाट्ये शान्तरसं नाङ्गीकृत्य काव्ये एवायं गृहीत: ।
न केवलं शान्तरस एव, अपि त्वस्य स्थायिभावेऽपि साहित्यमीमांसकेषु मतभेदो विद्यते – कोऽपि वा सर्वचित्तवृत्तिप्रशमम् (अभिनव:), कोऽपि वा सम्यग्ज्ञानम् (रुद्रट:), कश्चिद्वा निर्वेदम् (अभिनवो मम्मटश्च), कश्चन वा निर्विशेषचित्तवृत्तिम् (अभिनव:), अन्य: कोऽपि वा तृष्णाक्षयसुखम् ( आनन्दवर्धन: ), कश्चन वा धृतिम् ( भोज:) शान्तरसस्य स्थायिभावरूपेण समुल्लिखितवान्।
यत्र न सुखं न दु:खं न द्वेषो न मात्सर्यं सर्वभूतेषु च समता विद्यते, स एव शान्तरस: । रसस्यास्य लक्षणं विश्वनाथेनैवं संप्रदत्तम् –

शान्त: शमस्थायिभाव उत्तमप्रकृतिर्मत: ।
कुन्देन्दुसुन्दरच्छाय: श्रीनारायणदैवत: ।।
अनित्यत्वादिनाशेषवस्तुनि:सारता तु या ।
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ।।
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादय: ।
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिण: ।।
रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिण: ।
निर्वेदहर्षस्मरणमतिभूतदयादय: ।।
(सा. द., ३/२२८, पृष्ठा – १४५-१४६)

अस्य दृष्टान्तो दर्शनीय: -

शतायुष: पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान् ।
भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि ।।
एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकां च ।
महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि ।।
ये ये कामा दुर्लभा मर्त्यलोके सर्वान् कामांश्छन्दत: प्रार्थयस्व ।
इमा रामा: सरथा: सतूर्या न हीदृशा लम्भनीया मनुष्यै: ।
आभिर्मत्प्रत्ताभि: परिचारयस्व नचिकेतो मरणं मानुप्राक्षी: ।।
श्वोभावा मर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेज: ।
अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते ।।
न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत् त्वा ।

जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव ।।
अजीर्यताममृतानामुपेत्य जीर्यन् मर्त्यः क्वधःस्थः प्रजानन् ।
अभिध्यायन् वर्णरतिप्रमोदान् अतिदीर्घे जीविते को रमेत ।।
(कठ., १/१/२३-२८)

अत्र हि यमनचिकेतसोः संवादेन सांसारिकपदार्थानामनित्यता ब्रह्मज्ञानस्य चावश्यकता चित्रिते नाम । अयमेव शान्तरसस्य आलम्बनविभावः । यमराजसङ्गस्तथा तस्य (यमराजस्य) वाक्यश्रवणं चोद्दीपनविभाव एतस्य । विषयभोगे अनासक्तिरिति निर्वेदः (वैराग्यं वा – गीता, २/५२)। एष एवास्य व्यभिचारिभावः। नचिकेतसो ब्रह्मानन्दानुभूतिप्राप्तिसुखं तृष्णाक्षयसुखं वास्य स्थायिभावः। अस्य चानुभावो नचिकेतसो मनःसंयम आत्मध्यानं चेति। एवमत्र शान्तरसस्य लक्षणसङ्गतिर्दर्शयितव्या।

**अद्भुतरसः**

यस्य दर्शनेन विचित्रचित्तवृत्तिरभिव्यज्यते, स एवाद्भुतरस इति कथ्यते । अनेन चानन्यसाधारणरमणीयताया गभीरगोपनानन्द उपलभ्यते । अस्य लक्षणे विश्वनाथ उक्तवान् –

अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः ।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ।।
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ।
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसंभ्रमाः ।।
तथा नेत्रविकाशाद्या अनुभावाः प्रकीर्तिताः ।
वितर्कावेगसंभ्रान्तिहर्षाद्या व्यभिचारिणः ।।
(सा. द., ३/२२७, पृष्ठा – १४५)

अस्य दृष्टान्तो यथा –

केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः ।
केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ।।
श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य प्राणः ।
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ।।
न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः ।
न विद्मो न विजानीमो यथैतदनुशिष्यात् ।।
अन्यदेव तद्विदितादथो अविदितादधि ।
इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ।।
(केन., १/१-४)

अत्र गुरुशिष्यसंवादेन ब्रह्मतत्त्वं प्रतिपादितम्। साधारणतया मन्यते यदस्माकं मन एव स्वाधीनतया कार्य्यं करोति, तस्य कोऽपि परिचालको नास्ति। बुद्धीन्द्रियसमन्वितो यो देहो वर्तते, मनो वै तं परिचालयति। शिष्य एतादृशेन साधारणविश्वासेन सन्देहं प्रकाश्य प्रश्नं कृतवान् – केन प्रेरितं मन इष्टविषयं गच्छतीति। एवं सन्देहाद् यो विचारो जायते, स हि वितर्कः। एष एवाद्भुतरसस्य व्यभिचारिभावः। अथ शिष्यो गुरुसमीपाद् ज्ञातुमिष्टवान् – मनो नाम किं सत्यमेव स्वप्रतिष्ठं स्वाधीनं च? मनो यदि केनचित् परिचालितं भवति, तर्हि स कस्तावत्? इत्थं जिज्ञासाया उत्तरेण ज्ञायते यद् वस्तुतो मनो ब्रह्माधीनम्। एवमन्येषु इन्द्रियेषु बोध्यम्। मनआदिस्वाधीनतारूपाज्ञानतो लोकातीतवस्तुब्रह्मणो ज्ञानं भवतीति य एव चित्तविस्फार (चित्तप्रसारणं वा) उपतिष्ठते, स हि विस्मयः। अयं चाद्भुतरसस्य स्थायिभावः। यथार्थज्ञानरूपाभिप्रेतवस्तुलाभात् परं शिष्यस्य या चित्तप्रसन्नता, स हि हर्ष इति परिभाष्यते। अनुभावोऽयमेतस्य रसस्य। ब्रह्मरूपं लोकातिशयं वस्तु हि नाम आलम्बनविभावः। श्रोत्रस्य श्रोत्रं मनसो मनश्चेति तद्ब्रह्मणो गुणमहत्त्वं तावदुद्दीपनविभावः। अनेनैव रूपेणात्र अद्भुतरसस्य लक्षणमेलनं प्रदर्शनीयम्।

**भावः**

न केवलं रसशब्देन शृङ्गारादिकं बोध्यते, अपि तु तेन विज्ञाप्यते भावादिकमपि । उक्तञ्च विश्वनाथेन –

रसभावौ तदाभासौ भावस्य प्रशमोदयौ ।
सन्धिः शवलता चेति सर्वोऽपि रसनाद् रसाः ।।
(सा. द., ३/२३४, पृष्ठा – १५०)

अस्ति च विश्वनाथप्रदत्तं भावलक्षणम् –

सञ्चारिणः प्रधानानि देवादिविषया रतिः ।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ।।
(सा. द., ३/२३५, पृष्ठा – १५१)

अर्थात् प्रधानभूताः सञ्चारिभावाः, देवादिविषया रतिरुद्बुद्धमात्रस्थायिभावश्चेति त्रयं भाव इत्युच्यते । अनया दृष्ट्या उपनिषत्सु देवादिविषयकरतिरूपेण रसातिरिक्तो भावोऽपि दृश्यते । यथा –

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ।।
(ईश., १८)

अग्ने, अस्मान् कर्मफलभोगाय (धनाय) शोभनमार्गेण गमय। देव! सर्वप्राणिनां कर्म चित्तवृत्तिश्च त्वया ज्ञायेते, त्वमस्मत्समीपात् कुटिलं (वञ्चनात्मकम्) पापं वियोजय (विनाशय); त्वां प्रति (तुभ्यम्) बहुनमस्कारवचनानि निवेदयामः। एवमत्र मन्त्र ऋषेरग्निविषये रतिरूपो भाव एव प्रतिपादित आसीत्।
उपर्युक्तेन दृष्टान्तनिचयेन परिस्फुट्यते यद् उपनिषत्सु शान्ताद्भुतरसौ भावश्च प्राचुर्य्येण विद्यन्ते।

**ग्रन्थपञ्जी**


1. अभिज्ञानशकुन्तलम्, सत्यनारायणचक्रवर्तिसम्पादितम्, संस्कृतपुस्तकभाण्डारतः प्रकाशितम्, कोलकाता – ६, २००८।
2. ईशादिदशोपनिषदः (शाङ्करभाष्ययुताः), श्रीगोविन्दशास्त्रिसमलंकृताः, मोतीलालबनारसीदाससंस्थातः प्रकाशिताः, दिल्ली, १९६४ (प्रथमं संस्करणम्), २०१५ (षष्ठं संस्करणम्)।
3. उपनिषत्संग्रहः, पण्डितजगदीशशास्त्रिसम्पादितः, मोतीलालबनारसीदाससंस्थातः प्रकाशितः, दिल्ली, १९७० (प्रथमं संस्करणम्), २०११ (सप्तमं संस्करणम्)।
4. उपनिषद् इति वङ्गभाषामयं पुस्तकम्; अतुलचन्द्रसेनेन, सीतानाथतत्त्वभूषणेन महेशचन्द्रघोषेण चानूदितं सम्पादितं च, हरफप्रकाशनीसंस्थातः प्रकाशितम्, कलकाता – ७, २००० (अखण्डं संस्करणम्)।
5. उपनिषद्ग्रन्थावली, स्वामिगम्भीरानन्दसम्पादिता, उद्बोधनकार्यालयतः प्रकाशिता, कलकाता – ३, २०१५ (खण्डत्रयम्)।
6. उपनिषदों में काव्यतत्त्व इति हिन्दीभाषामयं पुस्तकम्, कृष्णकुमारधवन-महोदयेन रचितम्, विश्वेश्वरानन्द-वैदिकशोध-संस्थानतः प्रकाशितम्,

होशियारपुर, १९७६ (प्रथमं संस्करणम्)।
7. कठोपनिषद्, सीतानाथगोस्वामिसम्पादिता, संस्कृतपुस्तकभाण्डार इत्यत: प्रकाशिता, कलिकाता – ६, २००२।
8. दशरूपकम्, सीतानाथ आचार्यशास्त्रिणा देवकुमारदासेन च सम्पादितम्, संस्कृतपुस्तकभाण्डारत: प्रकाशितम्, कलिकाता – ६, २०१२ (अखण्डसंस्करणम्)।
9. ध्वन्यालोक:, सुबोधचन्द्रसेनगुप्तेन कालीपदभट्टाचार्येण च सम्पादित:, संस्कृत बुक डिपो इत्यत: प्रकाशित:, कलकाता – ६, २००५।
10. प्राचीन भारतीय अलंकारशास्त्रेर भूमिका इति पुस्तकम्, विष्णुपदभट्टाचार्यरचितम्, संस्कृत बुक डिपो इत्यत: प्रकाशितम्, कलकाता – ६, २००४।
11. भरतनाट्यशास्त्र (प्रथमं खण्डम्) इति वङ्गभाषामयं पुस्तकम्, सुरेशचन्द्रवन्द्योपाध्यायसम्पादितम्, नवपत्र प्रकाशन इत्यत: प्रकाशितम्, कलिकाता – ७३, १९९७।
12. रस ओ भाव इति पुस्तकम्, अशोकनाथशास्त्रिप्रणीतम्, संस्कृतपुस्तकभाण्डारत: प्रकाशितम्, कलिकाता – ६, १४०५ (वङ्गाब्द:)।
13. विक्रमोर्वशीयम्, संस्कृतसाहित्यसम्भार: (द्वादशं खण्डम् ), नवपत्र प्रकाशन इत्यत: प्रकाशितम, कलिकाता – ९, १९८२।
14. संस्कृत अलंकारसाहित्ये समालोचनार धारा इति पुस्तकम्, श्रीसत्यरञ्जनवन्द्योपाध्यायविरचितम्, संस्कृतपुस्तकभाण्डार इत्यत: प्रकाशितम्, कलिकाता – ६, २००५ (द्वितीयं संस्करणम्)।
15. साहित्यदर्पण:, अशोककुमारवन्द्योपाध्यायेन सम्पादित:, श्रीबलरामप्रकाशनीसंस्थात: प्रकाशित:, कलकाता – ६, १४११।
16. History of Sanskrit Poetics, Susheel Kumar De (Ed.), Oriental Book Centre, Delhi – 7, 2006.